International Journal of Sanskrit Research 2020; 6(2): 35-38

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(2): 35-38
© 2020 IJSR
www.anantaajournal.com
Received: 21-01-2020
Accepted: 25-02-2020

**Dr. V Srilakshmi**
Dept. of Advaita Vedanta
Rashtriya Sanskrit Vidyapeetha,
Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Dr. V Srilakshmi**
Dept of Advaita Vedanta
Rashtriya Sanskrit Vidyapeetha,
Tirupati, Andhra Pradesh, India

# अद्वैतवेदान्ते कर्मणां फलम्

**Dr. V Srilakshmi**

## 1. उपोद्घातः

अद्वैतवेदान्तस्य फलरूपमेव ज्ञानम्। ज्ञानमेव आत्मसाक्षात्कारः। आत्मसाक्षात्कारमेव मोक्षः अथवा मुक्तिस्वरूपः। विद्योत्पत्तौ कर्माणि अपेक्षन्ते वा नवा इति अस्माकं मनसि सन्देहो उत्पद्यते।

ज्ञानोत्पत्तौ न कर्मापेक्षा, यतः कर्माणि कामनानुरूपं स्वर्गादिफलं साधयन्ति। अतः कर्माणि विद्यायाः फलं नास्ति, कर्मणः सन्यासमेव ज्ञानोत्पत्तिः इति केचन। अद्वैतवेदान्ते ज्ञानकर्मसमुच्चयवादिनां मतं बहुधा निरस्तं भवति।

श्रुतिप्रस्थानम् उपनिषदः, न्यायप्रस्थानं सूत्रभाष्यं भगवद्गीता तु स्मृतिप्रस्थानम् इति प्रस्थानत्रयं भवति। अस्मिन् प्रस्थानत्रये शङ्कराचार्यः अस्मासु मनसि जायमानसन्देहनिवृत्त्यर्थं कर्मणः विषये प्रस्तुतवन्तः।

## 2. उपनिषदि कर्मणः फलम् (श्रुतिप्रस्थानम्) –

"कर्मणा पितृलोको विद्यया देवलोको देवलोको वै लोकानां श्रेष्ठः तस्माद्विद्यां प्रशंसन्ति"[1] पुत्रेण एव मनुष्यलोकः साध्यः। कर्मणा अग्निहोत्रादिलक्षणेन केवलेन पितृलोकः जेतव्यः न पुत्रेण नापि विद्यया। विद्यया देवलोकः साध्यः न पुत्रेण नापि कर्मणा। अत्र देवलोकः श्रेष्ठः तस्मात् विद्यां प्रशंसति। अत्र विद्या नाम उपासना। किन्तु ज्ञानोत्पत्तौ मैत्रेयीब्राह्मणे संन्यासः अङ्गत्वेन विहितः। याज्ञवल्क्यः भार्यां मैत्रेयीम् आमन्त्र्य एवमुक्तवान्। अस्मात् आश्रमात् गार्हस्थ्यात् ऊर्ध्वम् आश्रमं पारिव्राज्याख्यं यास्यन् अस्मि इति।

"जायापुत्रवित्तादिलक्षणं पाङ्क्तं कर्माविद्याविषयं यस्मान्नात्मप्राप्तिसाधनम्"[2]।

---

[1] बृ.उ-1-5-16

[2] बृ.उ.पु-189

जायापुत्रवित्तादयः न ब्रह्मविदे ज्ञानसाधनत्वेन विहिताः, ब्रह्मविदः आप्तकामत्वात् कामनासाधनानि तस्य न उपयोगिनी भवन्ति। ब्राह्मणक्षत्रियादिकर्मणां निर्वहणार्थं वर्णाश्रमादिलक्षणम् आत्मनि अध्यारोपितम्। क्रियाकारकफलात्मकम्। अविद्याविषयम्।

अत्र बृहदारण्यकोपनिषदि एवम् उक्तं भवति।

(अ) ब्रह्मज्ञानं पारिव्राज्यानुष्ठानेन सुसाध्यम्।

(आ) ज्ञानकर्मसमुच्चयानुपपत्तिः। याज्ञवल्क्यः कर्मी सन् प्रवव्राज, एतेन कर्मसमुच्चितं ज्ञानं न मोक्षहेतुः इति प्रदर्शितं भवति।

(इ) मैत्रेयी तु न कर्मानुष्ठानपरा। तथापि तस्यै मोक्षसाधनत्वेन ब्रह्मविद्या उपदिष्टा।

**कर्मापेक्षया उपासनायाः वैशिष्ट्यम् –**

उपासनानां ज्ञानप्राप्तिविषये न साक्षात् सम्बन्धः अपि तु परम्परया सम्बन्धः इति स्पष्टम्। कर्मणां फलं चित्तशुद्धिः, उपासनानां फलं चित्तैकाग्र्यम् इति। छान्दोग्योपनिषदि "प्राकृते पुरुषे कर्माभ्यासस्य अनादिवासनया दृढीकृतत्वात् अभ्यस्ततत्तत्कर्मत्यागे अतत्सम्बन्धिनि केवलोपासने चेतसः समर्पणं दुःखं कर्तुम् इति अङ्गावबद्धमेव तावदुपासनमुच्यते। एवमादौ उक्त्वा पुनः उपासनान्तराणि क्रमेण वक्तव्यानि"[3] इति।

यदा यदा उपासनादार्ढ्येन साधकः कर्ममार्गात् उत्थितो भवति तदा शनैः शनैः तत्त्वबोधनं भवति। "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति"[4] इत्यस्मिन् मन्त्रे विदुषः कर्म वीर्यवद् भवति इत्यभिप्रायः। अर्थज्ञानसहितम् उपासनम् अधिकफलदायकम् इति।

उपासनं नाम मानसं कर्म इत्युक्तम्। तेन उपासकः उपास्यब्रह्म प्राप्नोति। "अथ खलु क्रतुमयः पुरुषो, यथाक्रतुरस्मिन् लोके पुरुषो भवति, तथेत प्रेत्य भवति। स क्रतुं कुर्वीत"[5] यादृशी भावना यत्र सिद्धिर्भवति तादृशी इति न्यायेन उपासनाफलं सङ्कल्पाधीनं भवति। क्रतुर्नाम निश्चयः, सङ्कल्पः। अतः अयमेव देवयानः उत्तरायणमार्गः इति कथयन्ति।

**अतः छान्दोग्योपनिषदि –**

(अ) सगुणब्रह्मोपासनेन उत्तरमार्गः, अर्चिरादिमार्गः देवयानः।

(आ) केवलकर्मानुष्ठानपराः दक्षिणमार्गः धूममार्गः पितृयानः।

(इ) अशास्त्रविहितकर्मणां तिर्यग्योनिषु जननं पुनः पुनः संसरणम्।

कर्मिणः अशुद्धान्तःकरणा एव भवन्ति। शत्रुमित्रसंयोगेन रागद्वेषौ भवतः तेषां व्यवहारे। अशास्त्रविहितकर्मकृतः उभयमार्गभ्रष्टाः नीचयोनिषु जन्म प्राप्नुवन्ति।

साधनं प्रति पञ्चाग्निनित्यद्वारा वैराग्यं जनयितुं श्रुतिः प्रयतते। इत्येवं गतित्रयं ज्ञात्वा साधकः विरक्तो भवेत्।

**3. सूत्रभाष्ये कर्मणः विवेचना (न्यायप्रस्थानम्)**

सूत्रभाष्ये तृतीयाध्याये प्रथमपादे कृतात्ययाधिकरणे कर्मणः विषये एवम् उक्तं भवति। "कृतात्यये अनुशयवान्दृष्टस्मृतिभ्या यथेतमनेवं च"[6]। येन कर्मणा चन्द्रलोकम् आरूढाः फलोपभोगाय तस्मिन्नेव कर्मणि उपभोगेन क्षपिते सति तदितरकर्मविशिष्टा अवरोहन्ति। "तद्य इह रमणीय चरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाऽथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा"[7] इति श्रुतिः पुण्यकर्मणि उत्कृष्टयोनिं पापकर्मणि अधमयोनिं प्राप्नुवन्ति इति बोधयति। अस्यां श्रुतौ रमणीयचरणाः कपूयचरणा इति निर्देशात् चन्द्रलोके उपयोगप्रापककर्मातिरिक्तेन पुण्येन पापेन वा कर्मणा विशिष्टा एव अवरोहन्ति इति स्पष्टं प्रतीयते। "वर्णाश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुः श्रुतिवृत्तवित्तसुखमेधसो जन्म

[3] छान्दोग्योपनिषद्-1-1-1

[4] छान्दोग्योपनिषद्-1-1-10

[5] छान्दोग्योपनिषद्-3-14-1

[6] ब्र.भा-3-1-8

[7] छां.उ-5-10-7

प्रतिपद्यते" इति श्रुतिः। एवं निश्चयेन कर्मणः फलं तु पुनर्जन्मप्राप्ति इत्येव (अवगमनं भवति) ज्ञायते।

तृतीयाध्याये चतुर्थपादे सर्वापेक्षाधिकरणे एवम् आचार्याः कर्मणः विषये विवृण्वन्ति। "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्"[8] विद्यायाः स्वोत्पत्तौ सर्वापेक्षा च सर्वेषाम् आश्रमकर्मणाम् अपेक्षा अस्ति। यज्ञादिश्रुतेः "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन"[9] इत्यादिना यज्ञादिकर्मणां विविदिषा द्वारा ज्ञानसाधनत्वश्रवणात्। ज्ञानोत्पत्तौ कर्माणि बहिरङ्गसाधनानि उक्त्वा शमदमाद्यन्तरङ्गसाधनं भवतीति प्रदर्शितम्।

चतुर्थाध्याये प्रथमपादे अग्निहोत्राधिकरणे एवमुक्तं भवति। "अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्" [10] अग्निहोत्रादि नित्यनैमित्तिकं कर्मजातं चित्तशुद्ध्यादिपरम्परया तस्य ज्ञानस्य यत्कार्यं मुक्तिस्वरूपं तस्मै एव। "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन" [11] इति श्रुतौ नित्यादिकर्मणां ज्ञानहेतुत्वदर्शनात्।

सूत्रभाष्ये चतुर्थपादे विद्याज्ञानसाधत्वाधिकरणे एवमुक्तं भवति। "यदेव विद्ययेति हि"[12] उपास्ति सहितं वा केवलं वा नित्यादिकर्म अनुष्ठेयमिति अनियम एवमुक्तः। यस्मात् "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति" [13] इति श्रुतिः विद्यासहितस्य कर्मणो वीर्यवत्त्वं कथयन्ती विद्याविहीनस्य कर्मणो वीर्यवत्त्वं दर्शयति। तस्मात् केवलस्यापि नित्यादिकर्मणो ज्ञानार्थम् अनुष्ठानं सिद्ध्यति।

4. भगवद्गीतायां कर्मणः अनासक्तित्वम् (स्मृतिप्रस्थानम्) –

युद्धरङ्गे धनुर्धारी अर्जुनेन शोकमोहैर्बद्धः सन् श्रीकृष्णं (प्रार्थितवान्) शरणम् अर्थितवान् तदानीम् अर्जुनं कर्मणः विषये भगवान् एवं बहुधा उपदिष्टवान्।

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
माकर्मफलहेतुर्भूर्माते सङ्गोस्त्वकर्मणि[14] ॥
योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योगमुच्यते[15] ॥

कर्मणि एव अधिकारः न ज्ञाननिष्ठायां तत्र च कर्म कुर्वतः मा फलेषु अधिकारः अर्थात् कर्मफलतृष्णा माभूत्। यदा हि कर्मफलतृष्णाप्रयुक्तः कर्मणि प्रवर्तते तदा कर्मफलस्य एव जन्मनः हेतुः भवेत्। अतः योगस्थः सन् कुरु कर्माणि केवलम् ईश्वरार्थम् "ईश्वरो मे तुष्यतु" इति सङ्गं त्यक्त्वा धनञ्जय। फलतृष्णाशून्येन क्रियमाणे कर्मणि सत्त्वशुद्धिजा, ज्ञानप्राप्तिलक्षणासिद्धिः, तद्विपर्यजा असिद्धिः, तयोः सिद्ध्यासिद्ध्योः अपि समः तुल्यः भूत्वा कुरु कर्माणि तदेव समत्वं योगमुच्यते।

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति[16] ॥

कर्मणाम् अनारम्भात् अननुष्ठानात् नैष्कर्म्यं कर्मशून्यतां ज्ञानयोगेन निष्ठा यावत् पुरुषः न प्राप्नोति इत्यर्थः। तस्मात् –

नियतं कुरु कर्मत्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिद्ध्योदकर्मणः[17] ॥
कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।

8 ब्र.सू-3-4-27

9 बृ.आ-4-4-22

10 ब्र.भा-4-1-12-16

11 बृ.आ-4-4-22

12 ब्र.सू-4-1-18

13 छां.उ-1-1-10

14 भगवद्गीता 2 अध्याय, 47

15 भगवद्गीता 2 अध्याय, 48

16 भगवद्गीता 3 अध्याय, 4

17 भगवद्गीता 3 अध्याय, 8

लोकसंग्रहमेवापि सम्पश्यन् कर्तुमर्हसि[18] ॥

जनकादयः प्राप्तसम्यग्दर्शनाः लोकसंग्रहार्थं प्रारब्धकर्मत्वात् कर्मणा सहैव, असंन्यस्त्यैव कर्म, संसिद्धिम् आस्थिताः।

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः[19] ॥

परमेश्वरे सर्वज्ञे सर्वाणि कर्माणि संन्यस्य, अध्यात्मचेतसा विवेकबुद्ध्या "अहं कर्ता ईश्वराय भृत्यवत् करोमि" इत्यनया बुद्ध्या त्यक्ताशीः निर्ममः च भूत्वा विगतशोकः सन् युध्यस्व इत्यर्थः।
या कर्मजा सिद्धिः उक्ता ज्ञाननिष्ठायोग्यतया लक्षणा, तस्याः फलभूता नैष्कर्म्यसिद्धिः ज्ञाननिष्ठालक्षणा च वक्तव्येति श्लोकः आरभ्यते। तस्मात् –

असक्तबुद्धिस्सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां सन्यासेनाधिगच्छति[20] ॥

## 5. उपसंहारः

1. अतः सिद्धिं भवति यत् मोक्षसाधनत्वेन उपनिषत्सु कर्मणः न उपदेशः। वर्णाश्रमाद्यभिमानवानेव कर्मसु अधिकारी परन्तु विद्या स्वोत्पत्तौ कर्माणि अपेक्षन्ते। स्वर्गादिकामनया अनुष्ठितानां कर्मणां स्वर्गादिफलहेतुत्वे सति ईश्वरार्पणबुद्ध्या अनुष्ठितानि कर्माणि चित्तशुद्धिद्वारा ज्ञानोत्पत्तौ साधनानि भवन्ति इति श्रुतिप्रस्थाने।
2. कर्तृत्वभावेन क्रियमाणम् उपासनमिदम् अवबुद्ध्यामहे इति स्पष्टं ज्ञायते। यावत् भेदबुद्धिः तावत् सगुणप्राप्तिरेव।
सगुणस्य ब्रह्मणः अहं प्रतिपत्ताऽस्मि इत्येवं दृढभावेन उपासकः क्रत्वनुसारेण उपास्य ब्रह्मं प्राप्नोति। सगुणब्रह्मोपासकानां कर्माणां तु यावत्पुण्यं तावत् स्वर्गादिलोकेषु वासः, ततः पुनरावृत्तिः इति ज्ञायते। इत्येवं गतित्रयं ज्ञात्वा साधकः विरक्तो भवेदिति छान्दोग्योपनिषदि उपासनायाः विस्तृतचर्चा कृतवन्तः शङ्कराचार्यः।
3. सूत्रभाष्ये ज्ञानोत्पत्तौ कर्माणि बहिरङ्गसाधनानि उक्त्वा शमदमाद्यन्तरङ्गसाधनमिति आचार्यैः प्रतिपादितः। उपास्त्या सहितं केवलं वा नित्यादिकर्म अनुष्ठेयमिति अनियमः। विद्याविहीनस्य कर्मणो अपि वीर्यवत्त्वं भवति। तस्मात् केवलस्यापि नित्यादिकर्मणो ज्ञानार्थम् अनुष्ठानं सिद्ध्यति।
4. भगवद्गीतायां श्रीकृष्णः अर्जुनं कर्मणः श्रेष्ठत्वं बोधितवान्। विहितकर्मसु एव अधिकारः न तु फलेषु इति। यज्ञेन दानेन तपसा यद् कर्म अनुष्ठीयते तत् कर्म सत् एव भवति। अतः निरासक्तः सन् "कर्मसु योगः कौशलम्" इति सर्वत्र श्रद्धा प्रधानतया सर्वं सम्पाद्यते इत्यपि। मोक्षसंन्यासयोगे एवं भवति – "तत्" इति अनभिसन्धाय फलाकांक्षां त्यक्त्वा मोक्षकांक्षिणः दानक्रियाश्च विविधाः क्रियन्ते इति भगवान् श्रीकृष्णः उपदिष्टवान्।

## संदर्भ


1. बृहदारण्यकोपनिषत्, शाङ्करभाष्यम्, तत्त्वप्रकाशिकाटीका।
2. छान्दोग्योपनिषत्, शाङ्करभाष्यम्, तत्त्वप्रकाशिकाटीका।
3. ब्रह्मसूत्रभाष्यम्, शाङ्करभाष्यम्, शृङ्गेरि।
4. भगवद्गीता, शाङ्करभाष्यम्, गीताप्रेस् गोरख् पूर्।


[18] भगवद्गीता 3 अध्याय, 20

[19] भगवद्गीता 3 अध्याय, 30

[20] भगवद्गीता 18 अध्याय, 49